# Kuntikritam Shri Krishna Stotram

# કુન્તિકૃતં શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Kuntikritam Shri Krishna Stotram

File name : kuntikRRitaMshrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 1/8/18-36, 42-43||

Latest update : September 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 6, 2025

*sanskritdocuments.org*

# કુન્તિકૃતં શ્રીકૃષ્ણસ્તોત્રમ્

કુન્ત્યુવાચ ।
નમસ્યે પુરુષં ત્વાદ્યમીશ્વરં પ્રકૃતેઃ પરમ્ ।
અલક્ષ્યં સર્વભૂતાનામન્તર્બહિરવસ્થિતમ્ ॥ ૧૮॥

માયાજવનિકાચ્છન્નમજ્ઞાધોક્ષજમવ્યયમ્ ।
ન લક્ષ્યસે મૂઢદૃશા નટો નાટ્યધરો યથા ॥ ૧૯॥

તથા પરમહંસાનાં મુનીનામમલાત્મનામ્ ।
ભક્તિયોગવિધાનાર્થં કથં પશ્યેમ હિ સ્ત્રિયઃ ॥ ૨૦॥

કૃષ્ણાય વાસુદેવાય દેવકીનન્દનાય ચ ।
નન્દગોપકુમારાય ગોવિન્દાય નમો નમઃ ॥ ૨૧॥

નમઃ પઙ્કજનાભાય નમઃ પઙ્કજમાલિને ।
નમઃ પઙ્કજનેત્રાય નમસ્તે પઙ્કજાઙ્ઘ્રયે ॥ ૨૨॥

યથા હૃષીકેશ ખલેન દેવકી
કંસેન રુદ્ધાતિચિરં શુચાર્પિતા ।
વિમોચિતાહં ચ સહાત્મજા વિભો
ત્વયૈવ નાથેન મુહુર્વિપદ્ગણાત્ ॥ ૨૩॥

વિષાન્મહાગ્નેઃ પુરુષાદદર્શના-
દસત્સભાયા વનવાસકૃચ્છ્રતઃ ।
મૃધે મૃધેઽનેકમહારથાસ્ત્રતો
દ્રૌણ્યસ્ત્રતશ્ચાસ્મ હરેઽભિરક્ષિતાઃ ॥ ૨૪॥

વિપદઃ સન્તુ નઃ શશ્વત્તત્ર તત્ર જગદ્ગુરો ।
ભવતો દર્શનં યત્સ્યાદપુનર્ભવદર્શનમ્ ॥ ૨૫॥

જન્મૈશ્વર્યશ્રુતશ્રીભિરેધમાનમદઃ પુમાન્ ।
નૈવાર્હત્યભિધાતું વૈ ત્વામકિઞ્ચનગોચરમ્ ॥ ૨૬॥

નમોઽકિઞ્ચનવિત્તાય નિવૃત્તગુણવૃત્તયે ।
આત્મારામાય શાન્તાય કૈવલ્યપતયે નમઃ ॥ ૨૭॥

મન્યે ત્વાં કાલમીશાનમનાદિનિધનં વિભુમ્ ।
સમં ચરન્તં સર્વત્ર ભૂતાનાં યન્મિથઃ કલિઃ ॥ ૨૮॥

ન વેદ કશ્ચિદ્ભગવંશ્ચિકીર્ષિતં
તવેહમાનસ્ય નૃણાં વિડમ્બનમ્ ।
ન યસ્ય કશ્ચિદ્દયિતોઽસ્તિ કર્હિચિ-
દ્દ્વેષ્યશ્ચ યસ્મિન્વિષમા મતિર્નૃણામ્ ॥ ૨૯॥

જન્મ કર્મ ચ વિશ્વાત્મન્નજસ્યાકર્તુરાત્મનઃ ।
તિર્યઙ્નૃર્ષિષુ યાદઃસુ તદત્યન્તવિડમ્બનમ્ ॥ ૩૦॥

ગોપ્યાદદે ત્વયિ કૃતાગસિ દામ તાવ-
દ્યા તે દશાશ્રુકલિલાઞ્જનસમ્ભ્રમાક્ષમ્ ।
વક્ત્રં નિનીય ભયભાવનયા સ્થિતસ્ય
સા માં વિમોહયતિ ભીરપિ યદ્બિભેતિ ॥ ૩૧॥

કેચિદાહુરજં જાતં પુણ્યશ્લોકસ્ય કીર્તયે ।
યદોઃ પ્રિયસ્યાન્વવાયે મલયસ્યેવ ચન્દનમ્ ॥ ૩૨॥

અપરે વસુદેવસ્ય દેવક્યાં યાચિતોઽભ્યગાત્ ।
અજસ્ત્વમસ્ય ક્ષેમાય વધાય ચ સુરદ્વિષામ્ ॥ ૩૩॥

ભારાવતારણાયાન્યે ભુવો નાવ ઇવોદધૌ ।
સીદન્ત્યા ભૂરિભારેણ જાતો હ્યાત્મભુવાર્થિતઃ ॥ ૩૪॥

ભવેઽસ્મિન્ ક્લિશ્યમાનાનામવિદ્યાકામકર્મભિઃ ।
શ્રવણસ્મરણાર્હાણિ કરિષ્યન્નિતિ કેચન ॥ ૩૫॥

શ઼ૃણ્વન્તિ ગાયન્તિ ગૃણન્ત્યભીક્ષ્ણશઃ
સ્મરન્તિ નન્દન્તિ તવેહિતં જનાઃ ।
ત એવ પશ્યન્ત્યચિરેણ તાવકં
ભવપ્રવાહોપરમં પદામ્બુજમ્ ॥ ૩૬॥

અપ્યદ્ય નસ્ત્વં સ્વકૃતેહિત પ્રભો
જિહાસસિ સ્વિત્સુહૃદોઽનુજીવિનઃ ।

યેષાં ન ચાન્યદ્ભવતઃ પદામ્બુજા-
ત્પરાયણં રાજસુ યોજિતાંહસામ્ ॥ ૩૭॥

કે વયં નામરૂપાભ્યાં યદુભિઃ સહ પાણ્ડવાઃ ।
ભવતોઽદર્શનં યર્હિ હૃષીકાણામિવેશિતુઃ ॥ ૩૮॥

નેયં શોભિષ્યતે તત્ર યથેદાનીં ગદાધર ।
ત્વત્પદૈરઙ્કિતા ભાતિ સ્વલક્ષણવિલક્ષિતૈઃ ॥ ૩૯॥

ઇમે જનપદાઃ સ્વૃદ્ધાઃ સુપક્વૌષધિવીરુધઃ ।
વનાદ્રિનદ્યુદન્વન્તો હ્યેધન્તે તવ વીક્ષિતૈઃ ॥ ૪૦॥

અથ વિશ્વેશ વિશ્વાત્મન્ વિશ્વમૂર્તે સ્વકેષુ મે ।
સ્નેહપાશમિમં છિન્ધિ દૃઢં પાણ્ડુષુ વૃષ્ણિષુ ॥ ૪૧॥

ત્વયિ મેઽનન્યવિષયા મતિર્મધુપતેઽસકૃત્ ।
રતિમુદ્વહતાદદ્ધા ગઙ્ગેવૌઘમુદન્વતિ ॥ ૪૨॥

શ્રીકૃષ્ણ કૃષ્ણસખ વૃષ્ણ્યૃષભાવનિધ્રુગ્-
રાજન્યવંશદહનાનપવર્ગવીર્ય ।
ગોવિન્દ ગોદ્વિજસુરાર્તિહરાવતાર
યોગેશ્વરાખિલગુરો ભગવન્ નમસ્તે ॥ ૪૩॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે પ્રથમસ્કન્ધે અષ્ટમાધ્યાયાન્તર્ગતં
કુન્તિકતં શ્રીકૃષ્ણસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૧/૮/૧૮-૩૬, ૪૨-૪૩॥

bhAgavatapurANa . adhyAya 1/8/18-36, 42-43..

Proofread by PSA Easwaran

*Kuntikritam Shri Krishna Stotram*

pdf was typeset on September 6, 2025

Please send corrections to *sanskrit@cheerful.com*